## अष्टमः पाठः

# स्वामी आत्मानन्दः

'यत्र जीवः तत्र शिवः' इति मंत्रस्य साधकः त्यागमूर्तिश्च स्वामी आत्मानन्दः सदैव जनानां कल्याणार्थं समर्पितः आसीत्। सः ईदृशः सन्तः आसीत् यत् यस्य ध्येयवाक्यं सर्वत्र प्रशंसितम् आसीत्। यथा –

**"परगुण परमाणून् पर्वतीकृत्य नित्यम्।**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।"**

तस्य पितुः नाम धनीरामः मातुः नाम भाग्यवती च आसीत्। तौ धर्मपरायणौ आस्ताम्। स्वामी आत्मानन्दस्य जन्म 06 अक्टूबर 1929 तमे वर्षे अभवत्। आत्मानन्दस्य बाल्यकालस्य नाम तुलेन्द्रः आसीत्। सः 27 अगस्त 1989 तमे वर्षे निर्वाणं प्राप्य ब्रह्मलीनश्चाभवत्।

तस्य लक्ष्यमासीत् –

**" न त्वहं कामये राज्यं न च स्वर्गं नापुनर्भवम्।**
**कामये दुःख– तप्तानां प्राणिनामार्तिनाशनम्।।"**



तस्यानुजाश्ऽपि तस्यानुकरणं कृतवन्तः। तस्येच्छया तस्य मित्रैः शुभचिन्तकैश्च रायपुरे विवेकानन्द–विद्यापीठं स्थापितम्। तत्र बी.एड. प्रशिक्षणस्यापि समुचिता नवाचारी व्यवस्था वर्तते। बस्तरवनप्रान्तरे नारायणपुरे अबूझमाडक्षेत्रे रामकृष्णमिशनाश्रमः स्थापितः। अस्य सचिवेन पूज्यपाद– स्वामिना निखिलात्मानन्देन अपूर्वं नेतृत्वं प्रदत्तम्। अनेन आश्रमेण शिक्षा–चिकित्सा–

कृषि–जनसेवा–कृषकप्रशिक्षण केन्द्र–युवाप्रशिक्षणकेन्द्र–चलितचिकित्सा–विपणनक्षेत्रेषु च अति सम्पन्नानि सेवाकेन्द्राणि सञ्चालितानि सन्ति। आध्यात्मिकक्षेत्रेऽपि अस्य प्रयासः प्रशंसितः।

स्वामी विववेकानन्दः रायपुरे द्विवर्षपर्यन्तं समयं व्यतीतवान्। येन इदं नगरं परिपूतमभवत्। स्वामी विवेकानन्द– जन्मशताब्दी–वर्षे भव्यं स्मारकं निर्मातुं सः आत्मानंदः प्राणपणेनायतत्। अयम् आश्रमः आध्यात्मिकदर्शनस्य केन्द्रमस्ति। आश्रमैव 'पालीक्लिनिक' इति औषधालयः ग्रन्थालयः च स्थापितः। तत्रैव स्थापिते ठाकुररामकृष्णदेवालये स्वर्गोपमानि आनन्दानि प्रसृतानि।

स्वामी आत्मानंदः अतीव प्रतिभाशाली–वक्ता लेखकश्चापि आसीत्। आध्यात्म–सम्बन्धीनां अन्य– विषयानां च प्रवचनैः सः देशे ख्यातिं लब्धवान्। तस्य द्विखण्डात्मकं 'गीता–तत्त्वचिन्तनम्' इति ग्रंथः अतीव मनोहरः अस्ति। धर्मदर्शनक्षेत्रे अस्य महाभागस्य कृतयः पाठकेषु वैज्ञानिकदृष्टयभिवृद्धिं कुर्वन्ति।

स्वामीआत्मानन्दस्य संगठनकौशलम् अपूर्वम् आसीत्। तस्य निर्देशने संरक्षणे च मध्यप्रान्ते, महाराष्ट्र–उडीसा–राजस्थान–छत्तीसगढे बहवः रामकृष्णविवेकानन्द–आश्रमाः प्रतिष्ठिताः। अयं महापुरुषः शैशवकालादेव मेधावी प्रतिभासम्पन्नश्च आसीत्। सन् 1938 तमे वर्षे अस्य पिता महात्मा–गान्धिना स्थापिते बुनियादी–प्रशिक्षणविद्यालये वर्धायां शिक्षक–रुपेण नियुक्तः। प्रति रविवारे पिता–पुत्रौ गांधिनः दर्शनार्थं सेवाश्रमम् गच्छतः स्म। तत्र बालः तुलेन्द्रः गान्धिनः भ्रमण–सहायकश्चासीत्। अत्रैव तस्य बालमनसि सेवाभावना–बीजं स्फुटितम्। पित्रा सह बरबन्दाग्रामे अस्य शैशवं छात्रजीवनं च व्यतीतम्। तेन सर्वासु परीक्षासु प्रथमश्रेण्यामुत्तीर्य प्रतिभा–प्रतिस्थापिता। 1951 तमे वर्षे नागपुर–विश्वविद्यालयेन एम.एससी. (विशुद्धगणित) उपाधि स्वर्णपदकं च प्रदत्ते। सर्वोच्चाङ्कं प्राप्य कैम्ब्रिज विश्वविद्यालयस्य 'रेंग्लर फेलोशिप' प्राप्तवानसौ।

अनन्तरं भारतीय– प्रशासकीय–सेवा–परीक्षायामपि सफलतां प्राप्तवान् परन्तु मौखिक–
–परीक्षां त्यक्तवान्। तदनन्तरं तेन स्वजीवनं श्रीरामकृष्ण–विवेकानन्द–चरणौ समर्पितम्।

## शब्दार्थाः

| | | |
|---|---|---|
| ईदृशः | = | ऐसा |
| कियन्तः | = | कितने |
| कामये | = | चाहते हैं |
| पुनर्भवम् | = | पुनर्जन्म / (मोक्ष) |
| आर्ति | = | दुःख |
| परिपूतः | = | पवित्र हुआ |
| स्फुटितम् | = | अंकुरित हुआ |
| अपूर्वम् | = | जो पूर्व में न हुआ हो |
| प्रतिष्ठिताः | = | स्थापित हुए |
| व्यतीतम् | = | बिताया |
| प्राप्तवान् | = | प्राप्त किया |

## अभ्यासः प्रश्नाः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –
    1. आत्मानन्दस्य पितुः नाम किम्?
    2. आत्मानन्दस्य जन्म कदा अभवत्?
    3. आत्मानन्दस्य बाल्यकालस्य नाम किम् आसीत्।
    4. रामकृष्णमिशन आश्रमः कुत्र संस्थापितः?
    5. आत्मानन्देन लिखितग्रन्थस्य नाम किम्?
    6. स्वामीविवेकानन्दः रायपुरे कति वर्षं व्यतीतवान्?
2. अधोलिखितानां वाक्यानां हिन्दीभाषया अनुवादं कुरुत –
    1. मातुः नाम भाग्यवती आसीत्।
    2. न त्वहं कामये राज्यम्।
    3. अत्र सेवाकेन्द्राणि सञ्चालितानि।
    4. इदं नगरं परिपूतमभवत्।
    5. सः देशे ख्यातिं लब्धवान्।

**3. अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत –**

1. मै स्वर्ग नहीं चाहता हूँ।
2. आत्मानन्द के पिता का नाम धनीराम था।
3. नारायणपुर बस्तर वनप्रान्त में है।
4. स्वामी आत्मानंद का संगठन कौशल अपूर्व था।
5. उनके द्वारा जीवन समर्पण किया गया।

**4. रिक्तस्थानानि पूरयत –**

1. आत्मानन्दस्य ..............सर्वत्र प्रशंसितम् आसीत्।
2. .........................तमे वर्षे आत्मानन्दः ब्रह्मलीनः अभवत्।
3. रायपुरे विवेकानन्द–विद्यापीठं ................................... ।
4. .............................नेतृत्वं प्रदत्तम।
5. कैम्ब्रिज विश्वविद्यालयस्य ...........................फेलोशिप प्राप्तवानसौ।

**5. अधोलिखितानां पदानां मूलशब्द–विभक्ति–लिङ्गानि लिखत –**

| शब्दरुपम् | पदम् | मूलशब्दः | विभक्तिः | लिङ्गम् |
|---|---|---|---|---|
| यथा– | समाजे | समाज | सप्तमी | पुल्लिङ्ग |
| 1. | भक्तस्य | ––––– | ––––– | ––––– |
| 2. | भाग्यवत्याः | ––––– | ––––– | ––––– |
| 3. | इच्छया | ––––– | ––––– | ––––– |
| 4. | प्रान्तरे | ––––– | ––––– | ––––– |
| 5. | वर्धायाम् | ––––– | ––––– | ––––– |

**6. अधोलिखितानां पदानां धातुलकारपुरुषवचनानि लिखत–**

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | आसीत् | अस् | लङ्ग | प्रथम | एक |
| 1. | वर्तते | ––––– | ––––– | ––––– | ––––– |
| 2. | सन्ति | ––––– | ––––– | ––––– | ––––– |
| 3. | कुर्वन्ति | ––––– | ––––– | ––––– | ––––– |
| 4. | अगच्छत् | ––––– | ––––– | ––––– | ––––– |
| 5. | कथयन्ति | ––––– | ––––– | ––––– | ––––– |

**7. अधोलिखितानां अव्ययानां वाक्यप्रयोगं कुरुत –**

1. सर्वत्र 2. च 3. इदम् 4. सम्प्रति 5. सह

**8. पाठे निहितान् प्रत्ययान् चित्वा वाक्ये प्रयोगं कुरुत–**

R2HLTV

————000———